International Journal of Sanskrit Research 2022; 8(4): 267-269

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 267-269
© 2022 IJSR
www.anantaajournal.com
Received: 22-06-2022
Accepted: 29-07-2022

**अनमोल शर्मा**
सहायकाचार्य:,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व विद्यालय:, नई दिल्ली, भारत

**Corresponding Author:**
**अनमोल शर्मा**
सहायकाचार्य:,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्व विद्यालय:, नई दिल्ली, भारत

# औचित्यविचारचर्चायां वर्णितं क्षेमेन्द्राचार्यस्य पाण्डित्यम्

## अनमोल शर्मा

**सारांश**
औचित्यस्य साम्राज्यं सर्वत्र ईश्वरीयमानवीयव्यापारेषु नितरामस्ति। तत्र भगवतः सर्वावतारेषु प्रसङ्गानुगुणानां मोहिनीवामन नृसिंहादिरूपाणां ग्रहणं प्रमाणम् । मानवीयव्यापारेष्वपि प्रसङ्गानुगुणानां वक्तृत्वदातृत्वादिगुणगणानां वैशिष्ट्यात् मानवानां लौकिकसमुत्कर्षो दृश्यत एव । काव्येऽपि औचित्यस्य महती उपयोगिता तद्यथा औचित्यादेव रसव्यवहारः, अनौचित्यात् तु रसाभासः तथैव रसस्योत्कर्षहेतुत्वादेव गुणालङ्काररीत्यादीनांस्वस्वरूपावाप्तिः । क्षेमेन्द्राचार्येण औचित्यविचारचर्चायां सविस्तरं तदौचित्यस्य अन्वयव्यतिरेकनिदर्शनाभ्यांमीमांसा विहिता, तदेवात्र शोत्रपत्रे संक्षेपेण निरूप्यते।

**कूटशब्दः** औचित्यम्, आचार्यः, रसः, पाण्डित्यम्, गुणः, अलङ्कार, संघटना, प्रबन्धः, चित्तवृत्तिः, संप्रदायः, क्रिया, कारकम्, लिङ्गम्, उपसर्गः, निपातः, अन्वयः, व्यतिरेकः, स्थालिपुलाकन्यायः।

**प्रस्तावना**
वक्तव्यस्य विषयोऽस्ति 'औचित्यविचारचर्चायां वर्णितं क्षेमेन्द्राचार्यस्य पाण्डित्यम्' वस्तुतो विषय एव एतादृशो यच्चिन्तनं विनैव बहवो विचारा अहमहम्पूर्विकया बुद्धौ परापतन्ति, ततश्च कुतः प्रारभ इत्यस्ति मे मनसि कौतुकं तथापि आब्राह्मभुवनाल्लोकव्याप्तम् औचित्यमेव आदाय तावत् कथ्यते। तत्र औचित्यम् एतादृग् वस्त्यस्ति यस्य सत्ता ईश्वरीयमानवीयव्यवहारेषु सर्वत्र नितरामस्ति,तदुक्तं स्वयं शिथिलीकृतग्रन्थग्रन्थिकेन अनन्तराजसभापण्डितेन परमसहृदयाभिनवगुप्तशिष्येन' औचित्यसिद्धान्तप्रतिष्ठापकेन क्षेमेन्द्राचार्येण –

कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीमसा।
अच्युताय नमस्तस्मै परमौचित्यकारिणे॥[2]

क्षेमेन्द्राचार्येणात्र ईश्वरव्यापारव्याप्तमौचित्यं विनिवेदितं यत् येन विष्णुना समुद्रमन्थनोपलब्धामृतवितरणकाले दृष्टिः कज्जलेन मलिना कृता तस्मै परमौचित्यकारिणे अर्थात् शत्रुवञ्चनोचितनारीवेषधारकाय अच्युताय कदाचिदपि औचित्यच्युतिरहिताय विष्णवे नमः।

मानवीयव्यवहारेषु च औचित्यस्य साम्राज्यं पितृपुत्रयोः गुरुशिष्ययोः भ्रातृभगिन्योः, पत्नीपत्योःसेव्यसेवकयोः साधारणमनुष्ययोः सम्बन्धे सर्वत्र दृश्यत एव, तदभावे तु लौकिकव्यवहारस्य सत्तैव न भविष्यति शोभापि नैव भविष्यति तदुक्तं—

'स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।
उचितस्थान एव दन्तकेशादीनां शोभा।
क्षेमेन्द्राचार्येणाप्युक्तम्
कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
शौर्येण प्रणते रिपौ करूणया नायान्ति के हास्यता
मौचित्येन विना रुचिं प्रतनुते नालङ्कृतिर्नो गुणः।।'[3]

इत्थम् औचित्यस्य सत्तां महत्त्वञ्च प्रकाश्य तस्य स्वरूपं कथयति व्यासदासापरनामा' क्षेमेन्द्रो यत्-

उचितं प्राहुराचार्याः सदृशं किल यस्य यत् ।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ।

अर्थात् यस्य वस्तुनः यत् किल (निश्चयेन) सदृशं (अनुरूपं) तत् आचार्याः) उचितं कथयन्ति, तस्योचितस्य च यो भावस्तदेव औचित्यम् कथयन्ति । यद्यत्र सूक्ष्मेक्षिकया पश्यामश्चेज्ज्ञायते यत् सर्वप्रथमम् औचित्यपदस्य सर्वादौ प्रयोगः ध्वनिकारेण कृतः, ध्वन्यालोके व्याससमासाभ्यां रसमाश्रित्य औचित्यस्य चर्चा कृता गुणालङ्कारसंघटनाप्रबन्धादीनां वर्णने तत्रेदमेव साररूपेण कथितं ध्वनिकृता

अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परा॥

'अलङ्कारनिरूपणप्रसङ्गे लोचनकारेणाप्युक्तं यत्- कटककेयूरादिभिरपि हि शरीरसमवायिभिश्चेतन आत्मैव तत्तच्चित्तवृत्तिविशेषौचित्यसूचनात्मतयालङ्क्रियते तथाहि अचेतनं शवशरीरं कुण्डलाद्युपेतमपि न भाति अलङ्कार्यस्याभावात् यतिशरीरं कटकादियुक्तम हास्यावहं भवति,अलङ्कार्यस्यानौचित्यात्। न हि देहस्यानौचित्यमिति वस्तुत आत्मैवालङ्कार्यः, अहमलङ्कृत इत्यभिमानात् । तदित्थं यद्यपि ध्वनिकृल्लोचनकृद्भ्यां क्षेमेन्द्राचार्यात्पूर्वम् औचित्यपदस्य प्रयोगं महत्त्वञ्च प्रतिपादितं तथापि ग्रन्थविशेषे तस्यौचितस्य लक्षणादिकं नो दर्शितं प्रत्युत क्षेमेन्द्राचार्येण सूक्ष्मेक्षिकया औचित्यस्य स्वरूपं भेदादिकं च प्रदर्शितं ततश्च वस्तुतः क्षेमेन्द्राचार्य एव औचित्यसम्प्रदायस्य प्रवर्तकः । क्षेमेन्द्राचार्येण प्रधानरूपेण सप्तविंशति भेदा औचित्यस्य प्रदर्शिताः ते च -

पदे वाक्ये प्रबन्धार्थे गुणेऽलङ्करणे ते च।
क्रियायां कारके लिङ्गे वचने च विशेषणे ।।
उपसर्गे निपाते च काले देशे कुले व्रते ।
तत्त्वे सत्त्वेऽप्यभिप्राये स्वभावे सारसंग्रहे ।
प्रतिभायामवस्थायां विचारे नाम्न्यथाशिषि
काव्यस्याङ्गेषु च प्राहुरौचित्यं व्यापि जीवितम् ।।[8]

क्षेमेन्द्रस्य निरतिशयं पाण्डित्यं दृश्यत औचित्यविचारचर्चायां कारणं हि अन्वयव्यतिरेकाभ्यां ग्रन्थेऽस्मिन् स्वसिद्धान्तस्य प्रतिष्ठापनं कृतम् । प्राधान्येन व्यपदेशा भवन्ति इति नयेन रसौचित्यं प्रदर्श्यते,तत्रापि शान्तरसस्य विषये क्षेमेन्द्राचार्येण यत्प्रतिपादितं तत्संक्षेपेणात्र प्रदर्श्यते शान्तरसस्य वर्णने क्षेमेन्द्राचार्येणोक्तं यत् दृष्टान्तो यथा मम चतुर्वर्गसङ्ग्रहे

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं
दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयं।
माने ग्लानिभयं जये रिपुभयं काये कृतान्ताद्भयं
सर्वं नाम भवे भवेद्भयमहो वैराग्यमेवाभयम् ।।

अत्र क्षेमेन्द्राचार्येण भोगसुखादीनां भयप्रदानत्वं प्रदर्श्य पर्यन्ते वैराग्यस्यैवाभयतां च प्रदर्श्य शान्तरसस्यौचित्यपुरस्सरं प्रतिष्ठापनं कृतम् । इत्यन्वयमुखेन स्वसिद्धान्तं प्रतिपाद्य विशेषप्रतिपत्तये निषेधमुखेनैतत् प्रदर्शयति यत्, न तु यथा श्रीमदुत्पलराजस्य –

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा,
मणौ वा लोष्ठे वा कुसुमशयने वा दृषदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः,
क्वचित्पुण्यारण्ये शिवशिवशिवेति प्रलपतः ।। [10]

अत्र जीवनमुक्तोचितवस्तु निरुपन प्रसङ्गे यत् क्वचित्पुण्याख्ये यदभिहितं तद्विकल्पप्रतिपादकमभेदवासनाविरूद्धमनुचितमवभासते । एतदुदाहरणं तु स्थालिपुलाकन्यायेनात्र प्रदर्शितम् वस्तुतः सम्पूर्णेऽस्मिन् ग्रन्थे सर्वत्र क्षेमेन्द्राचार्येण केनाप्यनुन्मिलितस्य औचित्यतत्त्वस्य सूक्ष्मेक्षिकया वर्णनं कृतम् ।

**सन्दर्भ-**

1. .श्रुत्वाभिनवगुप्ताख्यात् साहित्यं बोधवारिधेः। आचार्यशेखरमणेर्विद्याविवृत्तिकारिणः ।। बृहत्कथामञ्जरी उपसंहार श्लोक-37 क्षेमेन्द्रः
2. मङ्गलाचरणम् औचित्यविचारचर्चा।
3. औचित्यविचारचर्चा कारिका सं. 6 व्याख्याने

4. तस्यात्मजः सर्वमनीषिशिष्यः श्रीव्यासादासापरपुण्यनामा । क्षेमेन्द्र इत्यक्षयकाव्यकीर्तिश्चक्रे नवौचित्यविचारचर्चाम्।।
5. औचित्यविचारचर्चा का. 7
6. ध्वन्यालोकः तृतीयोद्योतः का.16 व्याख्याने
7. द्वितीयोद्योत का.5 व्याख्याने लोचने
8. औचित्यविचारचर्चा का.8,9,10
9. औचित्यविचारचर्चा, शान्तरसवर्णनप्रसङ्गे
10. औचित्यविचारचर्चा, शान्तरसवर्णनप्रसङ्गे